Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 20

No. of Printed Pages – 7

# VU–94–Sans. Vangmay (D&D)

# वरिष्ठ उपाध्याय (मूक–बधिर) (CWSN) परीक्षा, 2025

## संस्कृत वाङ्मय (अनिवार्यः)

**समय** : 4 **घण्टे** 15 **मिनट (सपाद चतुरवादनम)**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांङ्काः अनिवार्यतः लेख्याः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

## खण्डः – 'अ'

**1) बहुविकल्पात्मक प्रश्नाः –** **[18 × 1 = 18]**

i) ''जीवति तु वंश्ये युवा'' इति सूत्रमस्ति – **[1]**

अ) गणसूत्रम् ब) संज्ञासूत्रम्

स) अधिकारसूत्रम् द) विधिसूत्रम्

ii) 'कुरुनादिभ्योण्यः' इति सूत्रेण प्रत्ययो भवति – **[1]**

अ) यप्रत्ययः ब) अण्–प्रत्ययः

स) यत्–प्रत्ययः द) ण्य–प्रत्ययः

iii) 'शुक्रियम्' इत्यत्र प्रत्ययोऽस्ति – **[1]**

अ) घन्–प्रत्ययः ब) यत्–प्रत्ययः

स) इय–प्रत्ययः द) अण्–प्रत्ययः

iv) 'युष्मदीयः' इत्यत्र प्रत्ययो भवति – **[1]**

अ) क–प्रत्ययः ब) अञ्–प्रत्ययः

स) छ–प्रत्ययः द) इय–प्रत्ययः

v) समाजं रक्षतीति – **[1]**

अ) धार्मिकः ब) राजनीतिकः

स) मार्दङ्गिकः द) सामाजिकः

vi) लुङ्लकारः प्रयुज्यते – **[1]**

अ) प्रेरणार्थे ब) सामान्यभूतार्थे

स) परोक्षानद्यतनभूतकाले द) सामान्यभविष्यत्काले

vii) तिप्–तस्–झि–० इति सूत्रेण लादेशाः भवन्ति – **[1]**

अ) सप्तदश ब) अष्टादश

स) नवदश द) विंशतिः

viii) 'भवति' इत्यत्र ऊकारस्य ओकारः केन सूत्रेण भवति? **[1]**

अ) सार्वधातुकार्धधातुकयोः ब) तिङ्शित्सार्वधातुकम्

स) अस्मद्युत्तमः द) ह्रस्वः

ix) 'अभवत्' इति रूपमस्ति – **[1]**

अ) आशिष्यर्थे लोट्–लकारस्य ब) सामान्यभूतार्थेलुङ्–लकारस्य

स) अनद्यतने लङ्–लकारस्य द) सामान्यभविष्यकाले लृट्–लकारस्य

x) यवनराजदूतरुपेण शिववीरस्य सविधे कः समागतः? [1]

अ) गौरसिंहः ब) अपजलखानः

स) द्वारपालः द) गोपीनाथ–पण्डितः

xi) गौरसिंहः गायकवेषेण कस्य शिविरं गच्छति? [1]

अ) शिववीरस्य ब) अपजलखानस्य

स) गोपीनाथस्य द) अम्बिकादत्तस्य

xii) पाणिः केन विभाति? [1]

अ) कङ्कणेन ब) कुण्डलेन

स) दानेन द) श्रुतेन

xiii) पद्माकरं विकचीकरोति – [1]

अ) दिनकरः ब) चन्द्रः

स) कमलम् द) जलम्

xiv) अमरकोषस्य लेखकः अस्ति – [1]

अ) अम्बिकादत्तः ब) बाणभट्टः

स) कालिदासः द) अमरसिंहः

xv) पतिपुत्ररहितायाः स्त्रियाः नाम अस्ति – [1]

अ) अवीरा ब) कुलटा

स) वधूः द) सभर्तृका

xvi) तिथिसंज्ञाः भवन्ति – [1]

अ) चत्वारः ब) पञ्च

स) षड् द) सप्त

xvii) सिंहस्य स्वामी अस्ति – [1]

अ) चन्द्रमा ब) बृहस्पतिः

स) सूर्यः द) मंगलः

xviii) एकस्मिन् मासे पक्षाः भवन्ति – [1]

अ) द्वे ब) त्रयः

स) चत्वारः द) पञ्च

**2)** रिक्तस्थानानि पूरयत – **[6 × 1 = 6]**

i) हलो यमां ......... लोपः । **[1]**

ii) तेन दीव्यति ......... जयति जितम् । **[1]**

iii) दन्त ............. उरच् । **[1]**

iv) रात्रिर्गमिष्यति ........... सुप्रभातम् । **[1]**

v) दुर्जनः .......... विद्ययाऽलंकृतोऽपि सन् । **[1]**

vi) रविः सोमस्तथा भौमो ....... गीष्पतिरेव च । **[1]**

**3)** अतिलघूत्तरात्मकप्रश्नाः – **[12 × 1 = 12]**

i) 'दन्त्यम्' इत्यत्र कः प्रत्ययः अस्ति? **[1]**

ii) 'हास्तिकः' इत्यत्र ठक् प्रत्ययः केन सूत्रेण भवति? **[1]**

iii) 'भवामि' इत्यत्र दीर्घः केन सूत्रेण भवति? **[1]**

iv) बीजापुरनरेशः शिववीरेण सह योद्धुं कं प्रेषितवान्? **[1]**

v) पुरुषस्य भाग्यानि कदा फलन्ति? **[1]**

vi) ऐश्वर्यस्य विभूषणं किम्? **[1]**

vii) पितुः भ्रातुः एकं नाम किम्? **[1]**

viii) दुहितुः पत्युः एकं नाम किम्? [1]

ix) विदुषी–स्त्रियाः द्वे नामनी लिखत। [1]

x) 'कन्या' इत्यत्र किं लिङ्गम्? [1]

xi) ताराणां समूहः किम् उच्यते? [1]

xii) राशयः कति सन्ति? [1]

## खण्डः – 'ब'

लघूत्तरात्मकप्रश्नाः – [10 × 2 = 20]

**4)** ''आदित्यः'' इति रूपं साधयत। [2]

**5)** ''शिक्षकः'' इति रूपं साधयत। [2]

**6)** ''भवितारौ'' इति रूपं साधयत। [2]

**7)** ''स्त्रीभ्यो ढक्'' इति सूत्रं व्याख्येयम्। [2]

**8)** पं. अम्बिकादत्तव्यासस्य संक्षिप्तपरिचयो लेख्यः। [2]

**9)** नीतिशतककारस्य सामान्यपरिचयो लेख्यः। [2]

**10)** वैश्यजातीयाः स्त्रियाः द्वे नामनी लिखत। [2]

**11)** पितुः त्रीणि नामानि लिखत। [2]

12) दक्षिणायनं कदा भवति ? [2]

13) ज्योतिष–अवकहडाचक्रानुसारेण करणस्य चत्वारि नामानि लिखत । [2]

## खण्डः – 'स'

दीर्घोत्तरीयाः प्रश्नाः –

14) अधोलिखितेषु कयोश्चिद् द्वयोः सूत्रयोः व्याख्या कार्या । [1½ + 1½ = 3]

क) उत्सादिभ्योऽञ्

ख) ग्रामजनबन्धुभ्यस्तल्

ग) तवकममकावेकवचने

घ) अनुशतिकादीनाञ्च

15) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गव्याख्या कार्या – [1 + 2 = 3]

क) आरम्भगुर्वी क्षयिणी क्रमेण,
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्ध – परार्द्ध भिन्ना,
छायेव मैत्री खल–सज्जनानाम् ।।

ख) निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु, गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ।।

16) अधोलिखितेषु वाक्येषु केषाञ्चित् त्रयाणां संस्कृतानुवादो विधेयः । [3 × 1 = 3]

क) कौत्स गुरु को दक्षिणा देता है।

ख) वह कल घर गया ।

ग) पाठशाला में अनेक छात्र पढते हैं।

घ) परिश्रम के बिना ज्ञान प्राप्त नहीं होता है।

ङ) वृक्ष के ऊपर बन्दर बैठे हैं।

**17)** अधोलिखितेषु केषुचित् त्रिषु वाक्येषु रेखांकितपदानि संशोधयत । **[3 × 1 = 3]**

क) बालः सिंहेन विभेति ।

ख) कविभिः कालिदासः श्रेष्ठः ।

ग) ते श्वः पाठं स्मरन्ति ।

घ) एषा कन्या गुणवान् अस्ति ।

ङ) वृक्षात् फलाः पतन्ति ।

## खण्डः – 'द'

निबन्धात्मक प्रश्नाः –

**18)** अधोलिखितेषु कौचिद् द्वौ प्रयोगौ साधनीयौ । **[2 + 2 = 4]**

क) आश्वपतम्

ख) पौरवः

ग) शालीयः

घ) आश्मम्

**19)** अधोलिखितयोः – गद्यांशयोः कस्यचिदेकस्य सप्रसंग–व्याख्या कार्या – **[1 + 3 = 4]**

क) दौवारिकः – (साक्षेपम्) कोऽपि कथं न प्रविशति? परिचिता वा प्राप्त–परिचयपत्रा व आहूता वा प्रविशन्ति, न तु भवादृशाः, ये तुम्बीं गृहीत्वा द्वाराद् द्वारम्–इति कथयन्नेव तत्तेजसेव घर्षितो मध्य एव विरराम ।

संन्यासी – (स्वगतम्) राजनीति – निष्णातः शिववीरः । सर्वथा दौवारिकता–योग्य एवायं द्वारपालः स्थापितोऽस्ति ।

ख) गोपीनाथः – कथयति विजयपुरेश्वरो यद् – ''वीर! परित्यज नवामिमां चञ्चलतामस्माभिः सह युद्धस्य, त्वदपेक्षयाऽत्यन्तमधिकंबलिनो वयं, प्रवृद्धोऽत्र कोषः महती सेना, बहूनि दुर्गाणि, बहवश्च वीराः सन्ति । तच्छुभमात्मानः इच्छसि चेत्, त्यक्त्वा निखिलां चञ्चलतां, शस्त्रं दूरतः परित्यज्य, करप्रदतामङ्गी कृत्य, समागच्छ मत्सभायाम् ।

**20)** अधोलिखितेषु कमप्येकं विषयमाश्रित्य निबन्धो लेखनीयः । (150 शब्दैः) **[4]**

क) संस्कृतभाषायाः महत्त्वम् ।

ख) महाकविः माघः ।

ग) हिमालयः ।

घ) सत्संगतिः ।

DO NOT WRITE ANYTHING HERE